# Shrimadpeddapuram Lakshmiyoganarasimhasvami Suprabhatam

# શ્રીમદ્પેદ્દાપુરં લક્ષ્મીયોગનારસિંહસ્વામિ સુપ્રભાતમ્

## Document Information

Text title : Peddapuram LakshmiyoganArasimhasvami Suprabhatam

File name : peddApuramlakShmIyoganArasiMhasvAmisuprabhAtam.itx

Category : vishhnu, koriDevishvanAthasharmA, suprabhAta

Location : doc_vishhnu

Author : koriDe vishvanAthasharmA, dharmapurI

Transliterated by : koriDe vishvanAthasharmA

Proofread by : koriDe vishvanAthasharmA

Acknowledge-Permission: Koride Vishwanatha Sharma

Latest update : February 19, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીમદ્પેદ્દાપુરં લક્ષ્મીયોગનારસિંહસ્વામિ સુપ્રભાતમ્

ॐ ગँ ગણપતયે નમઃ ॥

ॐ શ્રીવાગીશ્વર્યૈ નમઃ ॥

ॐ શ્રીલક્ષ્મી સમેત યોગનારસિંહસ્વામિને નમઃ ॥

શ્રી પેદ્દાપુરં લક્ષ્મીયોગનારસિંહસ્વામિ સુપ્રભાતમ્
કોરિડે વિશ્વનાથ શર્મા, સંસ્કૃતોપન્યાસકઃ ।

ઉત્તિષ્ઠોત્તિષ્ઠ લક્ષ્મીશ ! ઉત્તિષ્ઠ નરકેસરિન્! ।
ઉત્તિષ્ઠ જગતાં નાથ ! ઉદયાદ્રિં ગતો રવિઃ ॥ ૧॥

શ્રીલક્ષ્મિ! માધવિ ! રમે ! જગદેકમાતઃ
ક્ષીરાબ્ધિજે ! સુરનુતે ! કમલે ! મનોજ્ઞે ! ।
નારાયણીન્દુસહજે ! પરિરક્ષ લોકાન્
પેદ્દાપુરેશદયિતે ! તવ સુપ્રભાતમ્ ॥ ૨॥

હે વાસુદેવ ! પુરુષોત્તમ ! નારસિંહ !
લક્ષ્મીશ ! જગૃહિ પરાત્પર ! પદ્મનાભ ! ।
રક્ષ્યા ત્વયા હિ જગતી ન સદાઽન્યકૈસ્તુ
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૩॥

પ્રહ્લાદરક્ષક ! જનાર્દન ! દૈત્યનાશ !
પેદ્દાપુરાદ્રિનિલયાર્કસુધાંશુનેત્ર ! ।
ત્વદ્વીક્ષણાર્થમિહયેક્ષતિ ભક્તવૃન્દં
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૪॥

પેદ્દાપુરસ્યનિકટે ગિરિમાશ્રિતઃ સન્
ભક્તાન્ સદા હિ પરિપાલયસીશ ! નિત્યમ્ ।
ત્વદ્ભક્તરક્ષણકૃતે નનુ તે હિ નિષ્ઠા
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૫॥

ભક્તાઃ પ્રદક્ષિણવિધિં ત્વવલમ્ભ્ય નિષ્ઠાઃ
કુર્વન્તિચાત્ર શકટૈસ્તુ મુહુર્ ભ્રમન્તિ
યત્ત્વંહ્યભીષ્ટ ફલમાશુ દદાસિ નૂનમ્
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૬॥

બ્રહ્માદયઃ સુરવરા વરયોગિવૃન્દાઃ
સ્નાતાનુલિપ્તકૃતનિષ્ઠવરિષ્ઠભક્તાઃ ।
ધ્યાનૈકચિત્તવશગા સ્તવ દ્રષ્ટુકામાઃ
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૭॥

શ્રીચાન્દ્રમાનગણને શુભચૈત્રમાસે
એકાદશી શુભદિને વરશુક્લપક્ષે ।
કલ્યાણમીક્ષિતજનાસ્તવ લબ્ધભાગાઃ
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૮॥

યો માતૃદાસ્યમપહર્તુમયં દ્વિજેન્દ્રઃ
જિત્વા મહેન્દ્રમપિ દેવ! સુધાં નિનાય ।
સ ત્વીક્ષતેઽત્ર તવ વાહનવૈનતેયઃ
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૯॥

વૃક્ષાગ્રભગનિવસેષુ વિહઙ્ગમાશ્ચ
તે ચૈવ દર્શનફલં નનુ બોધયન્તિ ।
તત્ત્વં પ્રવક્તુમયિ તે પ્રકૃતિર્વરિષ્ઠા
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૧૦॥

મુગ્ધેષુ પદ્મનિકરેષુ નિબદ્ધભૃઙ્ગાઃ
અદ્યૈવભાનુકિરણૈસ્તુ વિમુક્તકા યે ।
ગાયન્તિ તેઽત્ર હિ સુતુલ્યવિમુક્તસઙ્ગાઃ
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૧૧॥

ઇન્દ્વર્કનેત્ર ! ભવતઃ ખલુ સેવનેષુ
ઇન્દુસ્તુ તે સ્વસહજામકરોદ્ધિ પત્નીમ્ ।
ભાનુઃ કરૈઃ સ્વપ્રથમૈર્ યજતે પદૌ તે
પેદ્દાપુરેશ ! નૃહરે ! તવ સુપ્રભાતમ્ ॥ ૧૨॥

અથ સ્તોત્રમ્

હૃતપાપચયાસ્તવ મન્દિરગા
ગતવિષ્ણુપદાસ્તવ ભક્તવરાઃ ।
જિતતાપસિકાસ્તવ દાસવરા
વિજયી ભવ દેવ! નૃસિંહ વિભો! ॥ ૧॥

તવ વૈરિરહો ! નનુ દૈત્યવરસ્
તવ લબ્ધવરો નનુ દૈત્યશિશુઃ ।
તવ દાતૃવરો નનુ દૈત્યબલિર્
વિજયી ભવ દેવ! નૃસિંહ વિભો! ॥ ૨॥

નનુ દૈત્યવધે તવ સિંહમુખમ્ ।
નુતપાલકૃતે નૃતનુસ્તવ ભોઃ ।
અવનીમવનેહ્યવતારિતવાન્
વિજયી ભવ દેવ! નૃસિંહ વિભો! ॥ ૩॥

મૃગરાજમુખાઞ્ચિતપુણ્યતનો !
ખગરાજવિરાજિતયાનવિભો
ફણિરાજવિભૂષિતપીઠહરે
વિજયી ભવ દેવ! નૃસિંહ વિભો! ॥ ૪॥

! નૃસિંહ વિભો!!!! નૃસિંહ વિભો!

અથ પ્રપત્તિઃ
પ્રહ્લાદકસ્ય હિ વચઃ પરિરક્ષણાર્થં
સ્તમ્ભોદ્ભવન્ પ્રકટિતાદ્ભુતદર્શનોઽસિ ।
ભક્તાનુરાગમયિ તે વિશદીકૃતં હિ
પેદ્દાપુરેશ ! ચરણૌ શરણં પ્રપદ્યે ॥ ૧॥

ત્વં લોકસૃષ્ટિકરણે નનુ બ્રહ્મરૂપઃ
તલ્લોકપાલનકૃતે નનુ  વિષ્ણુરૂપઃ
તજ્જીર્ણલોકવિલયીકરણે ચ રુદ્રઃ
પેદ્દાપુરેશ ! ચરણૌ શરણં પ્રપદ્યે ॥ ૨॥

દાસૌ તવૈવ નિતરાં ખલુ ભક્તિશૂન્યૌ
ભક્તાવમાનક્રિયયા ગતદૈત્યરૂપૌ ।
પ્રહ્લાદકસ્તુ તવ લબ્ધવરોઽર્ભદૈત્યઃ
પેદ્દાપુરેશ ! ચરણૌ શરણં પ્રપદ્યે ॥ ૩॥

શૂરોઽસ્મ્યહન્ત્વિતિ સુગર્વિતદુષ્ટદૈત્યઃ
મૃત્યું ત્વયા સ્વનિયતિં ત્વનુલઙ્ઘ્યયાતઃ ।
દુષ્ટાય કલ્પયસિ ભોઃ! સ્વવચોઽનુનાશં
પેદ્દાપુરેશ ! ચરણૌ શરણં પ્રપદ્યે ॥ ૪॥

બાલો ધૃવો નનુ જિતેન્દ્રિયતાપસોઽસૌ
યસ્તે પ્રસાદમલભજ્જગદુન્નતં હિ ।
ભક્તિસ્ત્વયીશ! પ્રમુખા ન વયઃ પ્રમાણં
પેદ્દાપુરેશ ! ચરણૌ શરણં પ્રપદ્યે ॥ ૫॥

અથ શ્રી મઙ્ગળાશાસનમ્
અકારાય હ્યનન્તાય અષ્ટૈશ્વર્યપ્રદાયિને ।
અદિમધ્યાન્તહીનાય નારસિંહાય મઙ્ગળમ્ ॥ ૧॥

ઇન્દ્રાદિભિઃ સુસેવ્યાય ઇન્દિરાનન્દદાયિને ।
ઈપ્સિતાર્થપ્રદાયાસ્મૈ નારસિંહાય મઙ્ગળમ્ ॥ ૨॥

ઉગ્રરૂપાય દૈત્યેભ્ય ઉડૂનામ્પતિચક્ષુષે
ઊર્ધ્વસ્રોતસ્વરૂપાય નારસિંહાય મઙ્ગળમ્ ॥ ૩॥

ઋગ્વેદાદિભિસ્તુત્યાય ઋદ્ધિબુદ્ધિપ્રદાયિને ।
ઋષિભિર્ ધ્યાનગમ્યાય નારસિંહાય મઙ્ગળમ્ ॥ ૪॥

એકરૂપાય નિત્યાય એકસ્મૈ વિશ્વચક્ષુષે ।
એકાન્તિજનરક્ષાય નારસિંહાય મઙ્ગળમ્ ॥ ૫॥

ઐહિકામુષ્મિકં દાત્રે ઐશ્વર્યાનન્દદાયિને ।
ઐક્ષ્વાકુકલરામાય નારસિંહાય મઙ્ગળમ્ ॥ ૬॥

ઓઙ્કારનાદરૂપાય ઓજસે સૂર્યકોટિનામ્ ।
ઓષધીશસુનેત્રાય  નારસિંહાય મઙ્ગળમ્ ॥ ૭॥

ઔગ્ર્યદૈત્યવિનાશાય ઔદુમ્બરપ્રિયાત્મને
ઔષધાયામયાનાં ચ નારસિંહાય મઙ્ગળમ્ ॥ ૮॥

સિદ્ધસાધ્યનુતાયાસ્મૈ દેવકોટિસ્તુતાય ચ
પેદ્દાપુરાદ્રિવાસાયનારસિંહાય મઙ્ગળમ્ ॥ ૯॥

બ્રહ્માદિભિઃ સુવન્દ્યાય ભક્તૈશ્વર્યપ્રદાયિને ।
પેદ્દાપુરાદ્રિવાસાયનારસિંહાય મઙ્ગળમ્ ॥ ૧૦॥

ફલશ્ૃતિ
યદ્ વિશ્વનાથકૃતવાઙ્મયસેવનં હિ
પેદ્દાપુરેશનૃહરેઃ શુભસુપ્રભાતમ્ ।
પ્રાતસ્તુ યે નિલયમેત્ય પઠન્તિ ભક્ત્યા
તે નારસિંહસદનુગ્રહપાત્રતાર્હાઃ ॥ ૧॥

મયા હિ કોરિડે કુલીન વિશ્વનાથશર્મણા
મુદા કૃતં તુ નારસિંહસુપ્રભાતસેવનમ્ ।
નરેન્દ્રકણ્ઠરાજિતં સદા હ્યરિષ્ટનાશકં
ભવેન્નૃસિંહમોદકં પ્રપાઠકાય મોક્ષદમ્ ॥ ૨॥

હરિઃ ૐ ।
સ્વસ્તિપ્રજાભ્યઃ પરિપાલયન્તાં
ન્યાયેન માર્ગેણ મહીં મહીશાઃ ।
ગોબ્રાહ્મણેભ્યઃ શુભમસ્તુ નિત્યં
લોકાઃ સમસ્તાઃ સુખિનો ભવન્તુ ॥

કાલે વર્ષન્તુ પર્જન્યાઃ પૃથિવી સસ્યશાલિની
દેશોઽયં ક્ષોભરહિતો બ્રાહ્મણાઃ સન્તુનિર્ભયાઃ ।
અપુત્રાઃ પુત્રિણઃ સન્તુ પુત્રિણઃ સન્તુ પૌત્રિણઃ
અધનાઃ સધનાઃ સન્તુ જીવન્તુ શરદાં શતમ્ ॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા
બુધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્ સકલં પરસ્મૈ
નારાયણાયેતિ સમર્પયામિ ॥

હરિઃ ઓં તત્સત્ પરમેશ્વરાર્પણમસ્તુ ॥

Composed by Koride Vishwanatha Sharma, Dharmapuri, Telangana
Proofread by Koride Vishwanatha Sharma.

*Shrimadpeddapuram Lakshmiyoganarasimhasvami Suprabhatam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*